अहिपूतनः, पुं, क्षुद्ररोगविशेषः। तल्लक्षणं यथा,—
"शकृन्मूत्रसमायुक्तेऽधौतेऽपाने शिशोर्भवेत्।
स्विन्ने वा स्नाप्यमानस्य कण्डूरक्तकफोद्भवा॥
कण्डूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते।
एकीभूतं व्रणं घोरं तं विद्यादहिपूतनम्"॥ *॥
तच्चिकित्सा यथा भावप्रकाशे,—
"तत्र संशोधनैः पूर्व्वं धात्रीस्तन्यं विशोधयेत्।
त्रिफलाखदिरक्वाथैर्व्रणानां क्षालनं हितम्॥
शङ्खसौवीरयष्ट्याह्वैर्लेपः कार्य्योऽहिपूतने"। इति
(रविनिश्चयटीकाकृता विजयेन व्याख्याप्रसङ्गतो भोजवचनं यदाहृतं तद्यथा,—यदुक्तं।
"दुष्टस्तन्यस्य पानेन मलस्याक्षालनेन च।
कण्डूराद्रवगावद्भिः पिड़केश्च समाचितः॥
अहिपूतनः सम्भवति यथादोषञ्च दारुणः"॥
इति सनिदानलक्षणसम्प्राप्तिकं चिकित्सितं वामटेन वा यदुक्तं तद्यथा,—
"मलोपलेपात् स्वेदाद्वा गुदे रक्तकफोद्भवः।
ताम्रोव्रणोऽन्तःकण्डूमान् जायते भूर्य्युपद्रवः॥
केचित्तं मातृकादोषं वदन्त्यन्येऽहिपूतनम्।
पृष्ठारुर्गुदकुन्दञ्च केचिच्च तमनामिकम्"॥ *॥
चिकित्सा।
"तत्र धात्र्याः पयःशोध्यं पित्तश्लेष्महरौषधैः। १
ह्रतशीतञ्च शीताम्बु-युक्तमन्तरपानकम्। २
सक्षौद्रताक्ष्यशैलेन व्रणं तेन च लेपयेत्। ३
त्रिफलाबदरीप्लक्षत्वक्-क्वाथ-परिषेचितम्। ४
कासीश-रोचना-तुत्थ-मनोह्वालरसाञ्जनैः। ५
लेपयेदम्लपिष्टैर्वा चूर्णितैर्वावचूर्णयेत्। ६
समस्तैरथवा यष्टीशङ्खसौवीरकाञ्जनैः। ७
सारिवाशङ्खनाभिभ्यामञ्जनस्य तथाऽथवा"॥ ८॥ *॥
चक्रपाणिसंग्रहे तु।
"पटोलपत्रत्रिफलारसाञ्जनविपाचितम्।
पीतं घृतं नाशयति कृच्छ्रामप्यहिपूतनाम्"॥
पटोलाद्यघृतम्। *॥ )

अहिफेनं, क्ली, (अहेः सर्पस्य फेनं गरलमिव। अत्युग्रत्वात्।) अफेनम्। इति राजनिर्घण्टः॥ आफिं इति भाषा। (अस्य पर्य्यायमाह भावप्रकाशकारः।
"उक्तं खसफलक्षीरमाफूकमहिफेनकम्"।
अस्य कार्य्यमाह शार्ङ्गधरः।
"पूर्व्वं व्याप्याखिलं कायं ततः पाकञ्च गच्छति।
व्यवायि तद्यथा भङ्गा फेनश्चाहिसमुद्भवम्"॥
अपरञ्चाफेनशब्दे आफूकशब्दे च ज्ञातव्यं।)

अहिर्ब्रध्नः, पुं, (अहिः ब्रध्ने यस्य।) शिवः। ("अजैकपादहिर्ब्रध्नः पिनाकी चापराजितः"। इति हरिवंशे।) रुद्रविशेषः। इति जटाधरः॥ (यथा हरिवंशे।
"सुरभी कश्यपाद्रुद्रानेकादश विनिर्म्ममे।
महादेवप्रसादेन तपसा भाविता सती॥
अजैकपादहिर्ब्रध्नस्त्वष्टा रुद्रश्च भारत"। इति।)

अहिर्ब्रध्नदेवता, स्त्री, (अहिर्ब्रध्नो रुद्रोऽधिष्ठात्री देवता यस्याः।) उत्तरभाद्रपदनक्षत्रं। इति ज्योतिःशास्त्रं॥

अहिभयं, क्ली, (अहेः सर्पतुल्यस्वपक्षात् सर्पाद्वा भयं।) राज्ञां स्वपक्षोद्भवभयं। इत्यमरः॥ सर्पभयं॥

अहिभयदा, स्त्री, (अहेर्भयं द्यति खण्डयतीति। अहिभय+दो+क) भूम्यामलकी। इति राजनिर्घण्टः॥ (भूम्यामलकीशब्देऽस्या गुणावली ज्ञातव्या॥)

अहिभुक्, [ज्] पुं, (अहिं भुङ्क्ते। अहि+भुज्+क्विप्।) गरुड़ः। मयूरः। इत्यमरः॥ नाकुली। गन्धनाकुली। इति राजनिर्घण्टः॥

अहिमर्द्दनी, स्त्री, (अहेर्म्मर्द्दनं भवत्यस्याः।) गन्धनाकुलीनाम कन्दविशेषः॥ इति राजनिर्घण्टः॥

अहिमारः, पुं, (अहिं मारयति यः सः। अहि+मृ+णिच्+अण्।) अरिमेदवृक्षः। इति राजनिर्घण्टः॥

अहिमेदकः, पुं, (अहिं मेदयति स्वगन्धमात्रेण गलयति यः सः।) अरिमेदवृक्षः। इति राजनिर्घण्टः॥ (अरिमेदशब्देऽस्य गुणादयो ज्ञेयाः॥)

अहिलता, स्त्री, (अहिरिव लता। दीर्घाकारत्वात्।) गन्धनाकुली। ताम्बूली। इति राजनिर्घण्टः॥

अहीरणिः, पुं, (अहीन् ईरयति दूरीकरोति। अहि+ईर+अनि।) द्विमुखसर्पः। इति त्रिकाण्डशेषः॥

अहे, व्य, क्षेपः। वियोगः। इति शब्दमाला॥

अहेरुः, स्त्री, (न हिनोति। हि गतौ बाहुलकादुः। ततो नञ्समासः।) शतमूली। इत्यमरः॥

अहो, व्य, (न+हा+डो।) धिगर्थः। शोकः। करुणार्थः। विषादः। सम्बोधनं। प्रशंसा। विस्मयं। पदपूरणं। असूया। वितर्कः। इति मेदिनी॥ (यथा रामायणे अयोध्याकाण्डे।
"अहो धिगिति सामर्षो वाचमुक्त्वा नराधिपः"।
"अहो मधुरमासां दर्शनं"। इति शाकुन्तले प्रथमाङ्के।)

अहोरात्रः, पुं, (अहश्च रात्रिश्च द्वयोः समाहारः। रात्राह्नाहाः पुंसि। अहः सर्व्वैकदेशे टच् इति टच्।) दिवानिशं। स तु सूर्य्योदयद्वयपरिच्छिन्नत्रिंशन्मुहूर्त्तात्मककालः। इत्यमरः॥ मनुष्याणां मासेन पैत्रोऽहोरात्रो भवति। मनुष्याणामेकवर्षेण देवानामहोरात्रो भवति। द्विसहस्रगुणितमानुष्यचतुर्युगमानेन ब्रह्मणोऽहोरात्रो भवति। तत्र मनुष्यमानेन ८६४००००००० वर्षा भवन्ति॥

अहोवत, व्य (अहो च वत च।) अनुकम्पा। खेदः। सम्बोधनं। इति विश्वमेदिनी॥
("अहोवतासिस्पृहणीयवीर्य्यः"। इति कुमारे।
"अहोवत! कीदृशीं वयोऽवस्थामापन्नोऽस्मि"। इति शाकुन्तले।
"अहोवत! महत्पापं कर्त्तुं व्यवसिता वयम्"। [इति गीता॥)

अह्नाय, व्य, (ह्रु ङ अपनयने। बाहुलकाद्भावे घञ्। वृद्धिः। पृषोदरादित्वात् वस्य यः। ततो नञ्समासः।) झटिति। द्रुतं। इत्यमरः।
(अह्नाय सा नियमजं क्लाममुत्ससर्ज"। इति कुमारे।
"अह्नाय तावदरुणेन तमो निरस्तम्"। इति रघौ।
"सच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटामूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः"। इति काव्यप्रकाशे।)

अह्रीकः, पुं, (नास्ति ह्रीर्लज्जा यस्य।) बौद्धः। क्षपणकः। इति त्रिकाण्डशेषः॥

अह्वला, स्त्री, (न+ह्वे+डल्।) भल्लातकवृक्षः। इति शब्दचन्द्रिका॥ भेला इति भाषा॥

---

## आ

आ, आकारः। द्वितीयस्वरवर्णः। अस्योच्चारणस्थानं कण्ठः। स च दीर्घः प्लुतश्च भवति।
"आकारं परमाश्चर्य्यं शङ्खज्योतिर्म्मयं प्रिये।
ब्रह्मविष्णुमयं वर्णं तथा रुद्रमयं प्रिये।
पञ्चप्राणमयं वर्णं स्वयं परमकुण्डली"॥
इति कामधेनुतन्त्रे॥ अस्य लेखनप्रकारो यथा—
"अकाररूपमासद्य दक्षकोड़ायता त्वधः।
ब्रह्मादयस्तथा शक्तिस्तासु तिष्ठन्ति नित्यशः"॥
इति वर्णोद्धारतन्त्रं। तस्य नामानि यथा—
"आकारो विजयानन्तो दीर्घच्छायो विनायकः।
क्षीरोदधिः पयोदश्च पाशो दीर्घास्यवृत्तकौ॥
प्रचण्ड एकजो रुद्रो नारायण इभेश्वरः।
प्रतिष्ठा मानदा कान्तो विश्वान्तक गजान्तकः॥
पितामहो द्विठान्तो भुः क्रिया कान्तिश्च सम्भवः।
द्वितीया मानदा काशी विघ्नराजः कुजो वियत्॥
स्वरान्तकश्च हृदयमङ्गुष्ठो भगमालिनी"॥
इति वर्णाभिधानं॥

आ, व्य, स्मृतिः। यथा। "आज्ञातं सगटायरेषः"। वाक्यं। यथा। "आ एवं मन्यसे"। इत्यमरः॥ (पूर्व्वं मैवं मंस्था इदानीं त्वेवं मन्यसे इत्यर्थः।) अनुकम्पा। (यथा, आ देवदत्तो दरिद्रः इति।) समुच्चयः। इति मेदिनी॥ (यथा, देवेभ्यश्च पितृभ्यश्च आ।) क्वचित् निषिद्धसन्धिवर्णः। आशब्दो योऽचा न सन्धीयते स इत्यर्थः। इति भरतः॥ ("आ एवं तत्त्वमर्य्यादा आ एवं तत्कृतं मया"। इति मुग्धबोधम्।)

आं, व्य, एवं। स्वीकारः। इत्यमरः॥

आः, पुं, महेश्वरः। इति पुरुषोत्तमः॥ पितामहः। वाक्यं। यथा अग्निपुराणे एकाक्षराभिधानं॥
"अ विष्णुः प्रतिषेधः स्यादाः पितामहवाक्ययोः।
सीमायामथाव्ययं आ भवेत् संक्रोधपीड़योः"॥

आः, [स्] व्य, कोपः। यथा। आः पापदुर्म्मुखः। ("आः किमेतदितिक्रोधादाभाष्य महिषासुरः"। इति मार्कण्डेयपुराणम्।
"आः पापे दुर्विनीते महाश्वेते"। इति कादम्बरी।) पीड़ा। यथा आः शीतं। इत्यमरभरतौ। स्मृतिः। स्पर्द्धा। तर्ज्जनं। इति शब्दरत्नावली॥

आकम्पितं, त्रि, (आकम्पते स्म। आङ्+कपि+क्त।) कम्पविशिष्टं। तत्पर्य्यायः। वेल्लितं २ प्रेङ्खितं ३ आधूतं ४ आधुतं ५ चलितं ६ इत्यमरः॥ कम्पितं ७ धुतं ८ व्याधूतं ९ विधूतं १० धूतं ११ प्रकम्पितं १२। इति शब्दरत्नावली॥ ("अनोकहाकम्पितपुष्पगन्धी"। इति रघौ।